# केन्द्रीयसंस्कृतविश्वविद्यालयः

## श्रीरणवीरपरिसरः

### (संसदः अधिनियमेन स्थापितः)

# परिसर-विवरणिका

## (Profile of the Campus)




2023

# परिसरविवरणिका

(Profile of the Campus)

---

## आचार्यः श्रीनिवासः वरखेडी

**कुलपतिः**

## प्रो. रणजित् कुमार बर्मन्

**कुलसचिवः (प्र.)**

## प्रो. मदन मोहन झाः

**निदेशकः**

## प्रो. सतीश कुमार कपूरः

**संयोजकः, आ.गु.आ.प्रकोष्ठः**

(2017-18 – 2021-22)

**केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरणवीरपरिसरः**

(संसदः अधिनियमेन स्थापितः)

**भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः**

**कोट-भलवाल, जम्मूः – 181122 (जम्मूकाश्मीरम्)**

प्रकाशकः –
**निदेशकः**
केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरणवीरपरिसरः
(संसदः अधिनियमेन स्थापितः)
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः
कोट-भलवाल, जम्मूः – **181122** (जम्मूकाश्मीरम्)
ईमेल - director-jammu@csu.co.in

**परिसर-विवरणिका (Profile of the Campus)**

वर्षम् – 2023
सर्वाधिकारः – केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मूः

सम्पादनपरामर्शकाः –
**प्रो. सतीश कुमार कपूरः**
**प्रो. श्यामदेव मिश्रः**
**डॉ. कैलासचन्द्रदाशः**
**डॉ. ऋषिराजः**
**डॉ. घनश्याम मिश्रः**
**डॉ. गोपाल वर्मा**
**डॉ. योगेन्द्र दीक्षितः**
**श्री विशाल महाजनः**

सङ्कलनकर्ता सम्पादकश्च
**डॉ. डी. दयानाथः**

# परिसरविवरणिकायाः विषयानुक्रमणिका


| क्र.सं. | विषयः | पृ.सं. |
|---|---|---|
| 1 | परिसरस्य परिचयः | 01 |
| 2 | परिसरे सञ्चाल्यमानाः पाठ्यक्रमाः विषयाश्च | 02 |
| 3 | वर्तमानसमये कार्यरतानां प्राध्यापकानां विवरणम् | 03 |
| 4 | विद्यास्थानानाम् अध्यक्षाः संयोजकाः च | 06 |
| 5 | परिसरस्य अर्थसङ्कल्पना | 08 |
| 6 | परिसरस्य विविधाः समितयः | 08 |
| 7 | परिसरे आयोज्यमानाः उत्सवाः, सङ्गोष्ठयः, कार्यशालाः, शास्त्रार्थसभाः, छात्रसङ्गोष्ठयः इत्यादयः | 19 |
| 8 | छात्राणां परीक्षापरिणामः | 38 |
| 9 | छात्राणां प्रवेशविवरणम् | 38 |
| 10 | छात्राणां छात्रवृत्तिविवरणम् | 42 |
| 11 | परिसरे विद्यमानानि संसाधनानि | 47 |
| | i) मुख्यभवनम् | 47 |
| | ii) आचार्य रामानुज देवनाथन् ग्रन्थालयः | 48 |
| | iii) अध्यापनकक्षाः प्रस्फूर्तकक्षाः च | 52 |
| | iv) नवग्रहवाटिका | 54 |
| | v) व्यायामशाला | 54 |
| | vi) भाषाप्रयोगशाला | 55 |
| | vii) मनोविज्ञानप्रयोगशाला | 56 |
| | viii) संगणकप्रयोगशाला | 57 |
| | ix) विविधक्रीडाङ्गनानि | 58 |
| | x) लघुवेधशाला | 59 |
| | xi) राष्ट्रियसेवायोजना | 62 |
| | xii) अध्यापकप्रकोष्ठः महिलाप्रकोष्ठः च | 63 |
| | xiii) मम्मटाचार्य-सम्मेलनकक्षः | 64 |
| | xiv) सभागारम् | 65 |
| | xv) छात्रावासः (पुरुषः/महिला) | 65 |
| | xvi) अल्पाहारगृहम् | 67 |
| | xvii) आवासः | 68 |
| | xviii) जलापूर्तिव्यवस्था | 69 |
| | xix) विद्युत् व्यवस्था | 69 |
| 12 | परिसरे विद्यमानाः विद्याशाखाः | 71 |
| | i) विद्याशाखायाः स्थापनावर्षम् | 71 |
| | ii) विद्याशाखायां वर्तमानसमये कार्यरताः अध्यापकाः | 71 |
| | iii) विद्याशाखायाः पुस्तकालयविवरणम् | 72 |
| | iv) अध्यापकानां विशिष्टाः उपलब्धयः | 73 |
| 13 | विगतपञ्चवर्षेषु प्राप्तोद्योगानां छात्राणां वार्षिकसङ्ख्या | 74 |
| 14 | विशिष्टाः पूर्वच्छात्राः | 75 |
| 15 | छात्राणां विशिष्टा उपलब्धयः (पुरस्कारादिकम्) | 76 |
| 16 | इग्नू-केन्द्रम् | 78 |
| 17 | वैदिक-अध्ययन-केन्द्रम् | 78 |
| 18 | योग-ध्यान-केन्द्रम् | 79 |
| 19 | परिसरस्य भावियोजनाः | 79 |
| 20 | उपसंहारः | 79 |

**केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः**
**(संसदः अधिनियमेन स्थापितः)**
**कोट-भलवाल, जम्मूः – 181122 (जम्मूकाश्मीरम्)**

# परिसरविवरणिका

## 1. परिसरस्य परिचयः

### परिसरस्य इतिहासः –

जम्मूकाश्मीरराज्यवंशजेन स्थापितस्य श्रीरघुनाथसंस्कृतमहाविद्यालयस्य 01.04.1971 तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानेन अधिग्रहणं कृतम् । श्रीरघुनाथसंस्कृतमहाविद्यालयः श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठत्वेन जम्मूस्थ-शास्त्रिनगरे स्थापितोऽभवत् । राष्ट्रियसंस्कृतसंस्थानं 07.05.2002 तमे दिनाङ्के मानितविश्वविद्यालयत्वेन भारतसर्वकारेण समुद्घोषितः । तदनु श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य 'श्रीरणवीरपरिसरः' इति नामान्तरणं सम्पन्नम् । एष परिसरः कोट-भलवालनामकस्थले 18.03.2007 तमे दिनाङ्के स्वीयभवनं प्राप्तः । केन्द्रीयमानवसंसाधनविकासमन्त्रिणः श्री अर्जुनसिंहमहोदस्य आध्यक्ष्ये पूर्वकेन्द्रीयमन्त्री जम्मूकाश्मीरप्रदेशस्य राजवंशीयः तदानीन्तनसांसदः डॉ. कर्णसिंहमहोदयः परिसरस्य मुख्यभवनं समुदघाटयत् । तदानीं मानितविश्वविद्यालयस्य कुलपतिः प्रो. वेम्पटि कुटुम्बशास्त्री आसीत् । परिसरस्य प्राचार्यः प्रो. विश्वमूर्तिशास्त्री आसीत् ।

### परिसरस्य क्षेत्रम् –

परिसरभूखण्डस्य क्षेत्रं 83.6 कनाल (10.45 एकड़) अस्ति । तस्मिन् क्षेत्रे निर्मितभवनानां क्षेत्रं 6729 वर्गमीटर परिमितम् अस्ति । परिसरेऽस्मिन् शैक्षिकभवनम्, पुस्तकालयभवनम्, योग-ध्यान-केन्द्रम्, निदेशकस्य आवासः, एकः महिलाच्छात्रावासः, एकः पुरुषच्छात्रावासः, शिक्षकावासाः, कर्मचारिणामावासाः, विद्युज्जनककक्षः, जलाधारः, क्रीडाक्षत्रं, यानस्थानकादीनि सन्ति । परिसरस्य अन्तः यानस्थानकसमीपे 'विद्यामहेश्वर' इति नाम्ना एकं शिवमन्दिरमपि राजते ।

**2. परिसरे सञ्चाल्यमानाः पाठ्यक्रमाः विषयाश्च**

परिसरे इमे अध्ययनकार्यक्रमाः सञ्चाल्यन्ते –

| क्र.सं. | कार्यक्रमस्य नाम | कालावधिः |
|---|---|---|
| 1 | प्राक्शास्त्री | 2 वर्षे |
| 2 | शास्त्री | 3 वर्षाणि |
| 3 | शास्त्री – प्रतिष्ठा | 4 वर्षाणि |
| 4 | शिक्षाशास्त्री | 2 वर्षे |
| 5 | आचार्यः | 2 वर्षे |
| 6 | विद्यावारिधिः | 3 वर्षाणि |
| 7 | चातुर्मासिकः ज्योतिषपरिचयपाठ्यक्रमः | 4 मासाः |
| 8 | चातुर्मासिकः वास्तुशास्त्रपरिचयपाठ्यक्रमः | 4 मासाः |
| 9 | एकवर्षीयः पौरोहित्य-कर्मकाण्डस्य पी.जी.डिप्लोमा पाठ्यक्रमः* | 1 वर्षम् |

*प्रस्तावितः

परिसरे शास्त्री-आचार्यकार्यक्रमयोः विविधाः विषयाः पाठ्यन्ते । तेषु शास्त्रिस्तरे छात्राणां सर्वतोमुखविकासाय शास्त्रेतरविषयाणां चयनाय उपलब्धाः सन्ति । तेषां विवरणमधः दीयते ।

| क्र.सं. | कार्यक्रमस्य नाम | शास्त्राणि |
|---|---|---|
| 1 | शास्त्री (शास्त्रीयविषयाः) | 1. वेदः (शुक्लयजुर्वेदः)<br>2. व्याकरणम्<br>3. ज्योतिषम्<br>4. दर्शनम्<br>5. साहित्यम् |
| 2 | शास्त्री (शास्त्रेतरयविषयाः) | 1. राजनीतिविज्ञानम्<br>2. इतिहासः<br>3. आङ्ग्लम्<br>4. सङ्गणकविज्ञानम्<br>5. पर्यावरणविज्ञानम् |

| | | |
|---|---|---|
| 3 | आचार्यः (शास्त्रीयविषयाः) | 1. वेदः (शुक्लयजुर्वेदः)<br>2. व्याकरणम्<br>3. सिद्धान्तज्योतिषम्<br>4. फलितज्योतिषम्<br>5. दर्शनम्<br>6. साहित्यम् |

**3. वर्तमानसमये कार्यरतानां प्राध्यापकानां संख्या (2022-23)**

| क्र.सं. | प्राध्यापकस्य नाम | पदम् | विद्याशाखा |
|---|---|---|---|
| 1 | प्रो. मदनमोहनझाः | निदेशकः | शिक्षाशास्त्रम् |
| 2 | प्रो. सतीशकुमारकपूरः | आचार्यः | साहित्यम् |
| 3 | प्रो. श्यामदेवमिश्रः | आचार्यः | ज्योतिषम् |
| 4 | डॉ. कैलासचन्द्रदाशः | सहाचार्यः | व्याकरणम् |
| 5 | डॉ. ऋषिराजः | सहाचार्यः | शिक्षाशास्त्रम् |
| 6 | डॉ. रामदासङ्गोत्रा | सहायकाचार्यः | ज्योतिषम् |
| 7 | डॉ. सुनीता | सहायकाचार्या | ज्योतिषम् |
| 8 | डॉ. प्रमोदकुमारशुक्लः | सहायकाचार्यः | व्याकरणम् |
| 9 | डॉ. घनश्याममिश्रः | सहायकाचार्यः | दर्शनम् |
| 10 | डॉ. मदनकुमारझाः | सहायकाचार्यः | शिक्षाशास्त्रम् |
| 11 | डॉ. देवेन्द्रकुमारमिश्रः | सहायकाचार्यः | शिक्षाशास्त्रम् |
| 12 | डॉ. डी. दयानाथः | सहायकाचार्यः | वेद-पौरोहित्य-कर्मकाण्डम् |
| 13 | डॉ. राजकुमारमिश्रः | सहायकाचार्यः | साहित्यम् |
| 14 | डॉ. रतनकुमारपाण्डेयः | सहायकाचार्यः | ज्योतिषम् |
| 15 | डॉ. गोपालवर्मा | सहायकाचार्यः | आङ्ग्लम् |

| | | | |
|---|---|---|---|
| 16 | डॉ. नीतूशर्मा | सहायकाचार्या (संविदा) | साहित्यम् |
| 17 | डॉ. तेजनाथपौडेलः | सहायकाचार्यः (संविदा) | साहित्यम् |
| 18 | डॉ. हरिशङ्करपाण्डेयः | सहायकाचार्यः (संविदा) | व्याकरणम् |
| 19 | डॉ. योगेन्द्रकुमारदीक्षितः | सहायकाचार्यः (संविदा) | राजनीतिविज्ञानम् |
| 20 | डॉ. सञ्जयकुमारमिश्रः | सहायकाचार्यः (संविदा) | हिन्दी |
| 21 | डॉ. श्वेतासूद | सहायकाचार्यः (संविदा) | आङ्ग्लम् |
| 22 | श्री विशालमहाजनः | अतिथिशिक्षकः | सङ्गणकविज्ञानम् |
| 23 | डॉ. मदनसिंहः | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 24 | डॉ. शुभश्रीदाशः | अतिथिशिक्षिका | शिक्षाशास्त्रम् |
| 25 | डॉ. विवेककुमारः | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 26 | डॉ. प्रमोदशुक्लः | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 27 | डॉ. सन्तोषगोडरा | अतिथिशिक्षिका | शिक्षाशास्त्रम् |
| 28 | डॉ. सुमनचन्द्रपन्तः ‘सुमन्तः’ | अतिथिशिक्षकः | साहित्यम् |
| 29 | डॉ. नवीनतिवारी | अतिथिशिक्षकः | ज्योतिषम् |
| 30 | श्री मनीन्दर सिंहः | अतिथिशिक्षकः | शारीरिकशिक्षा |
| 31 | श्री प्रदीपकुमारमिश्रः | अतिथिशिक्षकः | इतिहासः |
| 32 | श्री कमलकिशोरः | अतिथिशिक्षकः | डोगरी |
| 33 | श्री अखिलशर्मा | अतिथिशिक्षकः | सङ्गणकविज्ञानम् |
| 34 | डॉ. प्रदीपकुमारदीक्षितः | अतिथिशिक्षकः | वेद-पौरोहित्य-कर्मकाण्डम् |
| 35 | श्री प्रवीणकुमारः | अतिथिशिक्षकः | वेद-पौरोहित्य-कर्मकाण्डम् |
| 36 | डॉ. यशवन्तकुमारत्रिवेदी | अतिथिशिक्षकः | दर्शनम् |
| 37 | डॉ. सर्वेशत्रिपाठी | अतिथिशिक्षकः | दर्शनम् |
| 38 | डॉ. अनयमणित्रिपाठी | अतिथिशिक्षकः | वेद-पौरिहित्य-कर्मकाण्डम् |
| 39 | डॉ. पवनकुमारसिंहः | अतिथिशिक्षकः | हिन्दी |

| | | | |
|---|---|---|---|
| 40 | डॉ. शिवाशीषपागलः | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 41 | डॉ. प्रवीणमणित्रिपाठी | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 42 | डॉ. अनूपकुमारपाण्डेयः | अतिथिशिक्षकः | शिक्षाशास्त्रम् |
| 43 | डॉ. स्नेहलता | अतिथिशिक्षिका | शिक्षाशास्त्रम् |

परिसरे इदानीं पञ्चदश स्थायी प्राध्यापकाः, षट् संविदाध्यापकाः, द्वाविंशतिः अतिथिशिक्षकाश्च कार्यरताः सन्ति। एतेषु षट् महिला शिक्षिकाः, सप्तत्रिंशत् पुरुषशिक्षकाः च सन्ति। सर्वेऽप्यध्यापकाः विश्वविद्यालयानुदानायोगस्य नियमानुसारं योग्यताधारिणः सन्ति।



**4. विद्यास्थानानाम् अध्यक्षाः विभागानां संयोजकाः च**

परिसरे विविधविद्यास्थानानां विद्याशाखानाञ्च अध्यक्षाः संयोजकाश्च विश्वविद्यालयस्य अध्याध्यादेशानुसारं नियुक्ताः सन्ति। तेषां विवरणमधः दीयते।

| क्र.सं. | विद्यास्थानम्/विद्याशाखा | प्राध्यापकस्य नाम | पदम् | अध्यक्षः/संयोजकः |
|---|---|---|---|---|
| 1. | वेद-वेदाङ्ग-वैदिक-विज्ञान- विद्यास्थानम् | प्रो. श्याम देव मिश्रः | आचार्यः | अध्यक्षः |
| 2. | शिक्षाशास्त्र-कौशल प्रशिक्षण- विद्यास्थानम् | प्रो. मदन मोहन झाः | (निदेशकः) आचार्यः | अध्यक्षः |
| 3. | भाषा-साहित्य-संस्कृति-विद्यास्थानम् | प्रो. सतीश कुमार कपूरः | आचार्यः | अध्यक्षः |
| 4. | दर्शन-विद्यास्थानम् | प्रो. मदन मोहन झाः | (निदेशकः) आचार्यः | अध्यक्षः |
| 5. | समकालिक-ज्ञानप्रणालि-मानविकी-विद्यास्थानम् | प्रो. मदन मोहन झाः | (निदेशकः) आचार्यः | अध्यक्षः |
| 6. | बहुविषयक-विज्ञान-तकनीक-विद्यास्थानम् | प्रो. मदन मोहन झाः | (निदेशकः) आचार्यः | अध्यक्षः |
| 7. | व्याकरणशास्त्र-विद्याशाखा | डॉ. कैलास चन्द्र दाशः | सहाचार्यः | विभागीयसंयोजकः |
| 8. | ज्योतिषशास्त्र-विद्याशाखा | प्रो. श्याम देव मिश्रः | आचार्यः | विभागीयसंयोजकः |
| 9. | वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखा | डॉ. डी. दयानाथः | सहायकाचार्यः | विभागीयसंयोजकः |

| | | | | |
|---|---|---|---|---|
| 10. | वेदाङ्ग-वेदभाष्य-विद्याशाखा | डॉ. डी. दयानाथः | सहायकाचार्यः | विभागीयसंयोजकः |
| 11. | शिक्षाशास्त्र-विद्याशाखा | डॉ. ऋषिराजः | सहाचार्यः | विभागाध्यक्षः |
| 12. | संस्कृतसाहित्य-विद्याशाखा | प्रो. सतीश कुमार कपूरः | आचार्यः | विभागीयसंयोजकः |
| 13. | आंग्ल-विद्याशाखा | डॉ. गोपाल वर्मा | सहायकाचार्यः | विभागीयसंयोजकः |
| 14. | भारतीयभाषा-विद्याशाखा | प्रो. सतीश कुमार कपूरः | आचार्यः | विभागीयसंयोजकः |
| 15. | दर्शन-विद्याशाखा | डॉ. घनश्याम मिश्रः | सहायकाचार्यः | विभागीयसंयोजकः |
| 16. | सामाजिकविज्ञान-विद्याशाखा | प्रो. मदन मोहन झाः | आचार्यः (निदेशकः) | विभागीयसंयोजकः |
| 17. | संगणकविज्ञान-प्राकृतिकभाषाप्रसंस्करण-विद्याशाखा | प्रो. मदन मोहन झाः | आचार्यः (निदेशकः) | विभागीयसंयोजकः |

## 5. परिसरस्य अर्थसङ्कल्पना (Budget)

### विगतपञ्चवर्षेषु वेतनं विहाय आधारभूतसंरचनावर्धनाय कृतः व्ययः

| वर्षम् | 2017-18 | 2018-19 | 2019-20 | 2020-2021 | 2021-2022 |
|---|---|---|---|---|---|
| रूप्यकाणि (लक्षेषु) | 211660.00 | 2319472.00 | 9798800.00 | 2082543.00 | 2202341.00 |

| वर्षम् | शैक्षणिकसुविधानां अनुरक्षाणय कृतः व्ययः (वेतनं विहाय) | भौतिकसुविधानां अनुरक्षाणय कृतः व्ययः (वेतनं विहाय) |
|---|---|---|
| 2017-18 | 1222314 | 1018314 |
| 2018-19 | 3040981 | 193726 |
| 2019-20 | 19269729 | 9798800 |
| 2020-21 | 481037 | 102470 |
| 2021-22 | 1309320 | 895907 |

### विगतपञ्चवर्षेषु पुस्तकानां पत्रिकाणां च क्रयणाय वार्षिकव्ययः

| वर्षम् | व्ययः |
|---|---|
| 2017-18 | 400.00 |
| 2018-19 | - |
| 2019-20 | - |
| 2020-21 | 102470.00 |
| 2021-22 | 6400.00 |

## 6. परिसरस्य विविधाः समितयः

परिसरस्य शैक्षिक-प्राशासनिक-सांस्कृतिकार्याणां सुष्ठु सम्पादनाय विविधाः समितयः आरचिताः सन्ति । समितिसदस्याः संयोजकाश्च परिसरनिदेशकस्य आध्यक्ष्ये मार्गदर्शने च स्वीयं दायित्वं निर्वहन्ति । यथासमयं समितयः स्वीयदायित्वस्य इतिवृत्तं निदेशकाय प्रतिमासं समर्पयन्ति । अत्र परिसरस्य प्रधानसमितयः उल्लिख्यन्ते ।

| | |
|---|---|
| 1. **प्रवेश समिति (परम्परागत)** | प्रो. सतीश कुमार कपूर (संयोजक)<br>डॉ. कैलाश चन्द्र दाश<br>डॉ. राजकुमार मिश्र<br>डॉ. रतन कुमार पाण्डेय<br>डॉ. गोपाल वर्मा<br>श्री प्रवीण कुमार<br>डॉ. यशवन्त त्रिवेदी |
| 2. **प्रवेश समिति (शिक्षाशास्त्र)** | डॉ. ऋषि राज (संयोजक)<br>डॉ. मदन कुमार झा<br>डॉ. अनूप कुमार पाण्डेय<br>डॉ. शुभश्री दाश<br>डॉ. मदन सिंह<br>डॉ. विवेक कुमार<br>डॉ. शिवाशीष पागल |
| 3. **शिकायत निवारण व अनुशासन समिति** | प्रो. सतीश कुमार कपूर<br>प्रो. श्याम देव मिश्र (समन्वयक)<br>डॉ. कैलाश चन्द्र दाश<br>डॉ. ऋषि राज<br>डॉ. रामदास शर्मा<br>डॉ. गोपाल वर्मा<br>डॉ. सुनीता<br>डॉ. नीतू शर्मा<br>डॉ. मदन सिंह |
| 4. **छात्रावास समिति** | प्रो. सतीश कुमार कपूर<br>डॉ. गोपाल वर्मा (मुख्य छात्रावास अधीक्षक)<br>डॉ. सुमन चन्द्र पन्त 'सुमन्त' (छात्रावास प्रतिपालक-पुरुष)<br>डॉ. स्नेहलता (छात्रावास प्रतिपालक-महिला)<br>डॉ. शुभश्री दाश |

| | |
|---|---|
| | छात्र प्रतिनिधि (पुरुष)<br>छात्र प्रतिनिधि (महिला)<br>श्री विशन दास (अनु.अधिकारी) |
| 5. **पुस्तकालय समिति** | डॉ. ऋषि राज (संयोजक)<br>डॉ. रतन कुमार पाण्डेय<br>श्री कुमार रोहित<br>डॉ. हरिशंकर पाण्डेय<br>डॉ. मदन सिंह<br>डॉ. सुमनचन्द्र पन्त<br>डॉ. सर्वेश त्रिपाठी<br>डॉ. प्रवीण मणि त्रिपाठी<br>श्री विशन दास, (अनु. अधिकारी) |
| 6. **शैक्षिक स्पर्धा समिति** | प्रो. सतीश कुमार कपूर<br>प्रो.  श्याम देव मिश्र (संयोजक)<br>डॉ. प्रमोद कुमार शुक्ल, व्या.विभाग<br>डॉ. मदन कुमार झा<br>डॉ. राजकुमार मिश्र<br>डॉ. हरिशंकर पाण्डेय<br>डॉ. कृष्णमुरारी मणि त्रिपाठी<br>डॉ. सर्वेश त्रिपाठी |
| 7. **सांस्कृतिक, शास्त्रीय एवं कला समिति** | प्रो. सतीश कुमार कपूर (संयोजक)<br>डॉ. नीतू शर्मा<br>डॉ. तेजनाथ पौडेल<br>डॉ. सुमन चन्द्र पन्त ‘सुमन्त’<br>डॉ. स्नेहलता |
| 8. **स्थानीय शोध समिति** | प्रो. सतीश कुमार कपूर<br>प्रो. श्याम देव मिश्र<br>डॉ. कैलाश चन्द्र दाश (संयोजक) |

| | |
|---|---|
| | डॉ. ऋषि राज<br>डॉ.घनश्याम मिश्र<br>डॉ. डी. दयानाथ<br>निदेशक द्वारा नामित बाह्य सदस्य |
| **9. छात्रकल्याण समिति** | प्रो. श्याम देव मिश्र (संयोजक)<br>डॉ. गोपाल वर्मा<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. अनूप कुमार पाण्डेय<br>डॉ. नवीन तिवारी<br>श्री कमल किशोर<br>श्री सव्यसाची शर्मा, (यू.डी.सी.)<br>छात्रप्रतिनिधि-<br>1. आचार्य द्वितीय वर्ष<br>2. शि.शा. द्वितीयवर्ष<br>3. शास्त्री तृतीय वर्ष<br>4. प्रा. शा. द्वितीयवर्ष |
| **10. छात्रवृत्ति समिति** | डॉ. डी. दयानाथ (संयोजक)<br>डॉ. विवेक कुमार (शिक्षाशास्त्री)<br>डॉ. शिवाशीष पागल (शिक्षाशास्त्री)<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. सुमन चन्द्र पन्त ‘सुमन्त’<br>श्री प्रदीप कुमार मिश्र<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |
| **11. निःशक्त-जन-सहायता** | डॉ. प्रमोद कुमार शुक्ल, व्या.वि (संयोजक)<br>डॉ. घनश्याम मिश्र<br>डॉ. सुनीता<br>डॉ. देवेन्द्र कुमार मिश्र<br>श्री प्रवीण कुमार<br>श्री विशन दास, (अनु. अधिकारी) |

| | | |
|---|---|---|
| 12. | **परीक्षा समिति** | डॉ. डी. दयानाथ (संयोजक)<br>डॉ. गोपाल वर्मा<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. विवेक कुमार<br>श्री विशाल महाजन<br>श्री विशन दास, (अनु. अधिकारी)<br>श्री सुमन लाल शर्मा, (परीक्षा सहायक) |
| 13. | **प्रकाशन समिति (वैष्णवी, शिक्षामृतम् तथा त्रैमासिक-परिसर-पत्रिका)** | प्रो. सतीश कुमार कपूर (संयोजक)<br>डॉ. मदन कुमार झा<br>डॉ. राजकुमार मिश्र<br>डॉ. डी. दयानाथ<br>डॉ. गोपाल वर्मा<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. तेजनाथ पौडेल<br>डॉ. संजय कुमार मिश्र<br>डॉ. सुमन चन्द्र पन्त 'सुमन्त' |
| 14. | **छात्रप्रताडना निषेध समिति (Anti-Ragging)** | प्रो. श्याम देव मिश्र (संयोजक)<br>डॉ. रामदास शर्मा<br>डॉ. गोपाल वर्मा<br>डॉ. मदन कुमार झा<br>डॉ. मदन सिंह<br>डॉ. शुभश्री दाश<br>अभिभावक प्रतिनिधि<br>आरक्षी प्रतिनिधि<br>श्री बिशन दास (अनु.अधिकारी) |

| | | |
|---|---|---|
| 15. | **सूचना प्रसारण व जनसम्पर्क समिति** | डॉ. डी. दयानाथ (संयोजक)<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. संजय मिश्र<br>श्री प्रदीप कुमार मिश्र<br>डॉ. यशवन्त त्रिवेदी<br>डॉ. सर्वेश त्रिपाठी |
| 16. | **अध्यापक अभिभावक परामर्श समिति** | डॉ. कैलाश चन्द्र दाश (संयोजक)<br>डॉ. घनश्याम मिश्र<br>डॉ. राजकुमार मिश्र<br>डॉ. रतन कुमार पाण्डेय<br>डॉ. गोपाल वर्मा<br>डॉ. नवीन तिवारी<br>श्री कमल किशोर<br>डॉ. प्रवीण मणि त्रिपाठी<br>डॉ. पवन कुमार सिंह |
| 17. | **योजना, परियोजना, विकास समिति** | प्रो. सतीश कुमार कपूर (संयोजक)<br>प्रो. श्याम देव मिश्र<br>डॉ. कैलाश चन्द्र दाश<br>डॉ. ऋषि राज<br>डॉ. डी. दयानाथ<br>श्री बिशन दास (अनु.अधिकारी) |
| 18. | **क्रय समिति** | डॉ. ऋषि राज<br>डॉ. डी. दयानाथ<br>डॉ. गोपाल वर्मा<br>डॉ. शुभश्री दाश<br>श्री बिशन दास (अनु.अधिकारी) |
| 19. | **विक्रय, नीलामी एवं निविदा समिति** | समस्त विभागीय संयोजक एवं क्रयसमिति सदस्य |

| | | |
|---|---|---|
| **20.** | **महिला उत्पीडन निषेध समिति** | डॉ.सुनीता (संयोजिका)<br>डॉ. नीतू शर्मा<br>डॉ. शुभश्री दाश<br>डॉ. सन्तोष गोडरा<br>डॉ. स्नेहलता<br>श्री बिशन दास (अनु.अधिकारी) |
| **21.** | **मार्गदर्शन (व्यक्तित्व- संवर्धन रोजगार तथा नियोजन व छात्र परामर्श) समिति** | डॉ. ऋषि राज<br>डॉ. मदन कुमार झा (संयोजक)<br>डॉ. राजकुमार मिश्र<br>डॉ. डी. दयानाथ<br>डॉ. योगेन्द्र दीक्षित<br>श्री विशाल महाजन<br>डॉ. अनूप कुमार पाण्डेय<br>डॉ. यशवन्त त्रिवेदी |
| **22.** | **क्रीडा समिति** | डॉ. गोपाल वर्मा (संयोजक)<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. मदन सिंह<br>श्री मनिन्दर सिंह<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |
| **23.** | **सूचना का अधिकार, पारदर्शिता व जागरूकता निष्पादन समिति** | डॉ. ऋषि राज (संयोजक)<br>डॉ. डी. दयानाथ<br>डॉ. योगेन्द्र दीक्षित<br>श्री बिशन दास(अनु. अधिकारी) |
| 24. | **डिजिटल लर्निंग, भाषा प्रयोगशाला एवं निरीक्षण प्रकोष्ठ** | डॉ. ऋषि राज (संयोजक)<br>डॉ. मदन कुमार झा<br>डॉ. डी. दयानाथ<br>श्री विशाल महाजन<br>श्री अखिल शर्मा<br>डॉ. अनूप कुमार पाण्डेय<br>श्रीमती तिरुपति बाला (तकनीकी सहायक) |

| | |
|---|---|
| **25. आन्तरिक गुणवत्ता आश्वासन प्रकोष्ठ** | प्रो. मदन मोहन झा, अध्यक्ष<br>............(स्थानीयसदस्य)<br>प्रो. सतीश कुमार कपूर (समन्वयक)<br>प्रो. श्याम देव मिश्र<br>डॉ. ऋषि राज<br>डॉ. डी. दयानाथ<br>डॉ. योगेन्द्र दीक्षित<br>श्री विशाल महाजन<br>श्री बिशन दास (अनु.अधिकारी) |
| **26. राजभाषा प्रकोष्ठ** | डॉ. ऋषि राज (संयोजक)<br>डॉ. देवेन्द्र कुमार मिश्र<br>डॉ. संजय कुमार मिश्र<br>श्री कमल किशोर<br>डॉ. पवन कुमार सिंह |
| **27. परिसरीय आवास समिति** | प्रो. सतीश कुमार कपूर (संयोजक)<br>डॉ. कैलाश चन्द्र दाश<br>डॉ. ऋषि राज<br>डॉ. सुनीता<br>डॉ. डी. दयानाथ<br>डॉ. गोपाल वर्मा<br>श्री बिशन दास (अनु.अधिकारी) |
| **28. स्थानीय परामर्शदात्री समिति** | प्रो. सतीश कुमार कपूर<br>प्रो. श्याम देव मिश्र (संयोजक)<br>डॉ. कैलाश चन्द्र दाश<br>डॉ. प्रमोद कुमार शुक्ल, व्या.विभाग<br>डॉ. राजकुमार मिश्र<br>डॉ. डी. दयानाथ<br>स्थानीय बाह्य सदस्य<br>श्री बिशन दास (अनु.अधिकारी) |

| | | |
|---|---|---|
| 29. | **अनुसूचित जनजाति प्रकोष्ठ** | डॉ. ऋषि राज (संयोजक)<br>डॉ. सुनीता<br>डॉ. मदन कुमार झा<br>डॉ. गोपाल वर्मा<br>डॉ. संतोष गोडरा<br>श्री कमल किशोर<br>श्री बिशन दास (अनु. अधिकारी) |
| 30. | **राष्ट्रीय सेवा योजना समिति** | डॉ. योगेन्द्र दीक्षित (कार्यक्रम समन्वयक)<br>श्री मनिन्दर सिंह |
| 31. | **भौतिक सत्यापन समिति** | डॉ. राजकुमार मिश्र (संयोजक)<br>डॉ. रतन कुमार पाण्डेय<br>डॉ. कृष्ण मुरारी मणि त्रिपाठी<br>डॉ. मदन सिंह<br>डॉ. नवीन तिवारी<br>डॉ. सर्वेश त्रिपाठी<br>डॉ. यशवन्त त्रिवेदी<br>डॉ. पवन कुमार सिंह<br>डॉ. अखिलेश मिश्र<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |
| 32. | **उपकरण रख-रखाव समिति** | डॉ. रामदास शर्मा (संयोजक)<br>डॉ. रतन कुमार पाण्डेय<br>डॉ. अनूप कुमार पाण्डेय<br>श्री विशाल महाजन<br>श्री अखिल शर्मा<br>डॉ. शिवाशीष पागल<br>श्रीमती तिरुपति बाला (तकनीकी सहायक)<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |

| | |
|---|---|
| **33. श्री शंकर शास्त्रार्थ परिषद् संचालन समिति** | डॉ. प्रमोद कुमार शुक्ल, व्या. वि (संयोजक)<br>डॉ. राजकुमार मिश्र<br>डॉ. डी. दयानाथ<br>डॉ. हरिशंकर पाण्डेय<br>डॉ. तेजनाथ पौडेल |
| **34. स्वच्छता समिति** | डॉ. रामदास शर्मा (संयोजक)<br>डॉ. सुनीता<br>डॉ. मदन कुमार झा<br>डॉ. मदन सिंह<br>डॉ. प्रवीण मणि त्रिपाठी<br>डॉ. संजय कुमार मिश्र<br>डॉ. नवीन तिवारी<br>डॉ. अनय मणि त्रिपाठी<br>श्री सव्यसाची शर्मा (यू.डी.सी.)<br>श्री राज मोहम्मद (सफाई कर्मचारी) |
| **35. शारदा विशिष्ट व्याख्यानमाला आयोजन समिति** | प्रो. सतीश कुमार कपूर (संयोजक)<br>डॉ. ऋषि राज<br>डॉ. राजकुमार मिश्र<br>डॉ. डी. दयानाथ<br>डॉ. प्रमोद शुक्ल, शि.शा. विभाग<br>डॉ. अखिलेश मिश्र |
| **36. परिसरीय जलापूर्ति व्यवस्था समिति** | डॉ. मदन सिंह<br>डॉ. सुमन चन्द्र पन्त 'सुमन्त'<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |
| **37. विविध दिवसोत्सव / सप्ताहोत्सव पालन समिति** | डॉ. कैलाश चन्द्र दाश (संयोजक)<br>डॉ. डी. दयानाथ<br>डॉ. नीतू शर्मा<br>डॉ. योगेन्द्र दीक्षित |

| | |
|---|---|
| | डॉ. अनूप कुमार पाण्डेय<br>डॉ. नवीन तिवारी<br>डॉ. स्नेहलता |
| **38. समय सारिणी निर्माण समिति** | डॉ. ऋषि राज (शि.शा. समय सारिणी)<br>डॉ. डी. दयानाथ (संयोजक)<br>डॉ. रतन कुमार पाण्डेय<br>डॉ. अनूप कुमार पाण्डेय (प्रा.शा. समय सारिणी)<br>डॉ. योगेन्द्र दीक्षित<br>डॉ. यशवन्त कुमार त्रिवेदी<br>श्री सव्यसाची शर्मा (यू.डी.सी.) |
| **39. समान अवसर प्रकोष्ठ** | डॉ. सुनीता (संयोजक)<br>डॉ. प्रमोद कुमार शुक्ल<br>डॉ. घनश्याम मिश्र<br>डॉ. देवेन्द्र कुमार मिश्र<br>अभिभावक प्रतिनिधि<br>छात्र प्रतिनिधि<br>श्री बिशन दास (अनु.अधिकारी) |
| **40. तकनीकी समिति** | श्री विशाल महाजन (संयोजक)<br>डॉ. विवेक कुमार<br>श्री अखिल शर्मा<br>डॉ. प्रमोद शुक्ल (शि.शा.विभाग)<br>श्रीमती तिरुपति बाला (तकनीकी सहायक) |

**7. परिसरे आयोज्यमानाः उत्सवाः, सङ्गोष्ठयः, कार्यशालाः, शास्त्रार्थसभाः, छात्रसङ्गोष्ठयः इत्यादयः**

श्रीरणवीरपरिसरे प्रतिवर्षं विविधाः उत्सवाः, सङ्गोष्ठ्यः कार्यशालाः, शास्त्रार्थसभाश्चेति विविधाः कार्यक्रमाः आयोज्यन्ते । तेषु मुख्यरूपेण जम्मूकाश्मीर-राज्यस्तरीयशास्त्रीयस्पर्धाः, वार्षिकोत्सवः, विभागीयसङ्गोष्ठ्यः, विशिष्टव्याख्यानानि, श्रीशङ्करशास्त्रार्थसभा, युवमहोत्सवः, नाट्यमहोत्सवः, इत्यादयः सन्ति । कतिपय कार्यक्रमाणां विवरणमधः प्रदत्तम् ।

**2017-18**

**नाट्यमहोत्सवः**

- राष्ट्रियसंस्कृतसंस्थानेन आयोजितः पञ्चदशतमः संस्कृतनाट्यमहोत्सवः 22-24 नवम्बर 2017 पर्यन्तं अगरतलायाम् एकलव्यपरिसरे आयोजितः । अत्र परिसरस्य छात्रैः कविकर्णपूरप्रणीतस्य **'चैतन्यचन्द्रोदयम्'** इति नाटकस्य मञ्चनं कृतम् । नाट्यप्रस्तुतौ परिसरस्य शिक्षाशास्त्रविभागस्य छात्रः श्री अरुणशर्मा प्रथमपुरस्कारं, शोधच्छात्रः ऋषिकुमारः द्वितीयपुरस्कारं, शास्त्री तृतीयवर्षस्य छात्रः अङ्कजशर्मा तृतीयपुरस्कारं च प्राप्नुवन् ।








**युवमहोत्सवः**

- राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं विभिन्नपरिसरेषु युवमहोत्सवस्य आयोजनं क्रियते । अस्मिन् वर्षे मार्चमासस्य 08 दिनाङ्कात् 11 दिनाङ्कपर्यन्तं युवमहोत्सवः के.जे. सोमैया संस्कृतविद्यापीठे, मुम्बईपरिसरे, मुम्बई, महाराष्ट्रे समायोजितः । अस्मिन् युवमहोत्सवे छात्राः विविधस्पर्धासु भागं गृहीतवन्तः । युवमहोत्सवे वेदाचार्य द्वितीयवर्षस्य छात्रः विवेकखजूरिया लघुचलच्चित्रप्रतियोगितायां कांस्यपदकं प्राप्तवान् । शिक्षाशास्त्रविभागस्य छात्रा मोनालिसा प्रधान चित्रकलाप्रतियोगितायां कांस्यपदकं प्राप्तवती । शैक्षणिकप्रतियोगितासु शिक्षाशास्त्रविभागस्य छात्रः दीपेन्द्रः काव्यरचनास्पर्धायां कांस्यपदकं प्राप्तवान् । क्रीडाप्रतियोगितासु परिसरदलं हस्तकन्दुकस्पर्धायां स्वर्णपदकं विजयिनोऽभवत् । तथा च शिक्षाशास्त्रविभागस्य छात्रः रोहितशर्मा मल्लयुद्धे कांस्यपदकं प्राप्तवान् । परिसरस्य शिक्षाशास्त्रविभागस्य छात्रौ अंकुशकुमारः जयदीपः च मल्लयुद्धे एव कांस्यपदकं प्राप्तवन्तौ । तेन सह शिक्षाविभागस्य छात्रा राजलक्ष्मी मिश्रा चक्रक्षेपणस्पर्धायां रजतपदकं प्राप्तवती ।

**केन्द्रीयविद्यालयशिक्षकाणां सेवाकालिकप्रशिक्षणम्**

- 15.05.2017 से 26.05.2017 पर्यन्तं परिसरे केन्द्रीयविद्यालयससङ्घटनस्य संस्कृतशिक्षकेभ्यः सेवाकालिकप्रशिक्षणशिबिरस्य आयोजनं कृतम् । कार्यक्रमस्य समन्वयकः पूर्वप्राचार्यः प्रो. बच्चाभारती आसीत् ।

**परिसरीयाः कार्यक्रमाः**

- 21.06.2017 तमे दिनाङ्के अन्ताराष्ट्रिययोगदिवसस्य समायोजनं परिसरे अभवत् । अस्य संयोजकः साहित्यविभागाध्यक्षः डॉ. सतीशकुमारकपूरः आसीत् ।
- 06.07.2017 तमे दिनाङ्के परिसरे सत्रारम्भहवनस्य समायोजनमभवत् । कार्यक्रमेऽस्मिन् परिसरस्य वेदच्छात्राः विविधपूजापद्धतेः प्रशिक्षणं प्राप्नुवन् । अस्य कार्यक्रमस्य संयोजकः ज्योतिषविभागस्य प्राध्यापकः डॉ. चन्द्रमौलिरैणा आसीत् ।
- संस्कृतसप्ताहस्य आयोजनं 04.08.2017 तमे दिनाङ्के अभवत् । डॉ. नेहा शर्मा प्रखण्ड-विकास-अधिकारी, कोट भलवाल, जम्मू मुख्यातिथिः आसीत् । परिसरस्य पूर्वप्राचार्यः प्रो. प्रियतमचन्द्र शास्त्री

विशिष्टातिथिः आसीत्। कार्यक्रमस्य अध्यक्षः परिसरस्य प्राचार्यः प्रो. लोकमान्यमिश्रः आसीत्। अस्मिन् अवसरे परिसरस्य छात्रेभ्यः विविधाः प्रतियोगिताः आयोजिताः आसन्।

- परिसरे संस्कृतसप्ताहस्य समापनसत्रस्य आयोजनं 10.08.2017 तमे दिनाङ्के अभवत् । कार्यक्रमे मुख्यातिथिः मुहम्मद इलियाज़ खाँ (SDM) आसीत् । विशिष्टातिथिरूपेण परिसरस्य पूर्वप्राचार्यः प्रो. विश्वमूर्ति शास्त्री आसीत् । ज्योतिषविभागाध्यक्षस्य डॉ. प्रभातकुमारमहापात्रस्य विशिष्टव्याख्यानम् अभवत् । कार्यक्रमस्य अध्यक्षः परिसरस्य प्राचार्यः प्रो. लोकमान्य मिश्रः आसीत् । संस्कृतसप्ताहकार्यक्रमस्य संयोजकः साहित्यविभागाध्यक्षः डॉ. सतीशकुमारकपूरः आसीत्।
- अन्ताराष्ट्रिययुवदिवसस्य आयोजनं 12.08.2017 दिनाङ्के रेड रिबन् क्लब इत्यस्य संयुक्ततत्त्वावधाने अभवत्। कार्यक्रमस्य संयोजकौ डॉ. योगेन्द्र कुमार दीक्षितः डॉ. निगम पाण्डेयः आस्ताम्।
- परिसरे 25.08.2017 तमे दिनाङ्के गणेशचतुर्थीमहोत्सवे पूजनकार्यक्रमः समायोजितः । अस्य कार्यक्रमस्य संयोजकौ डॉ. तेजनाथपौडेलः डॉ. धनेशकुमारपाण्डेयः च आस्ताम् । बनतलाबस्थ-केन्द्रीयविद्यालयस्य प्राचार्यः श्री वी. सन्तोषकुमारः कार्यक्रमे मुख्यातिथिः आसीत्।
- परिसरे 14.09.2017 तमे दिनाङ्के हिन्दीपखवाड़ा समारोहः आयोजितः । अत्र मुख्यातिथिः रेडियोकाश्मीर इत्यस्य निदेशिका सुश्री अञ्जलिशर्मा आसीत् । विशिष्टातिथिः जम्मूविश्वविद्यालयस्य हिन्दीविभागस्य आचार्या प्रो. परमेश्वरीशर्मा आसीत्। परिसरप्राचार्यः कार्यक्रमस्य अध्यक्षः आसीत्।
- परिसरे 13.10.2017 तमे दिनाङ्के विश्वविख्याता नृत्याङ्गना सुश्री रोजालिनी महान्ती ओडिशी नृत्यस्य प्रदर्शनं कृतवती।
- 31.10.2017 तमे दिनाङ्के परिसरे राष्ट्रिय-एकता-दिवसः समायोजितः। अस्य कार्यक्रमस्य संयोजकः डॉ. घनश्याममिश्रः सहसंयोजकौ डॉ. धनेशकुमारपाण्डेयः डॉ. शुभश्री दाश च आस्ताम्।
- जम्मूकाश्मीरराज्यस्तरीयस्पर्धाः 13.11.2017 तमे दिनाङ्के परिसरे समायोजितः। अस्य संयोजकाः डॉ. सच्चिदानन्दशर्मा, डॉ. कृष्णमुरारिमणित्रिपाठी, डॉ. डी. दयानाथः च आसन्।
- 24.12.2017 तः 02.01.2018 पर्यन्तं परिसरे केन्द्रीयविद्यालयसङ्घटनस्य संस्कृतशिक्षकेभ्यः सेवाकालिकप्रशिक्षणशिबिरस्य आयोजनं कृतम्। अस्यः संयोजकः श्री शरत् चन्द्र शर्मा आसीत्।

➢ राष्ट्रियमतदाता दिवसः परिसरे 25.01.2018 तमे दिनाङ्के समायोजितः । अस्य संयोजकः डॉ. योगेन्द्रदीक्षितः आसीत्।

➢ 02.01.2018 तमे दिनाङ्के जयपुरपरिसरस्य शारीरिकशिक्षा विभागस्य आचार्यः प्रो. गजेन्द्रशर्मवर्यः 'खेल एवं योग की महत्ता' इति विषये विशिष्टव्याख्यानं प्रास्तौत्।

➢ 21.02.2018 तमे दिनाङ्के मातृभाषादिवसः आयोजितः।

**2018-19**

**नाट्यमहोत्सवः**

➢ राष्ट्रीयसंस्कृतसंस्थानेन (मानितविश्वविद्यालयेन), नवदेहलीद्वारा 8-10 मार्च 2019 पर्यन्तं 16 तमः नाट्यमहोत्सवः गुरुवायूरपरिसरे (केरले) आयोजितः । परिसरस्य छात्रैः कवि श्री अनङ्गहर्षेण रचितं **'तापसवत्सराजचरितम्'** इति संस्कृतनाटकं प्रस्तुतम् । परिसरच्छात्रा दीप्तिमिश्रा (शिक्षाशास्त्री) प्रथमपुरस्कारं, मधुबाला (शिक्षाशास्त्री) द्वितीयपुरस्कारं, शुभमशर्मा (शिक्षाशास्त्री) च तृतीयपुरस्कारं प्राप्तवन्तः।





**अखिलभारतीयशास्त्रीयप्रतियोगिता**

- राष्ट्रीयसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:), नवदेहलीद्वारा 2019 इतिवर्षे 6-9 जनवरीपर्यन्तम् एकलव्यपरिसरे, अगरतलायां 57 तम्या: अखिलभारतीयशास्त्रीयस्पर्धायाः आयोजनं कृतम् । अस्यां स्पर्धायां परिसरस्य छात्राः विविधस्पर्धासु भागं गृहीतवन्तः ।

**अखिलभारतीयसंस्कृतछात्रप्रतिभामहोत्सव: 2019**

- राष्ट्रियसंस्कृतविद्यापीठेन (मानितविश्वविद्यालयेन) फरवरी मासस्य 4-7 दिनाङ्कपर्यन्तं तिरुपतिनगरे (आन्ध्रप्रदेशे) 13 तमस्य अखिलभारतीयसंस्कृत-छात्रप्रातिभ-महोत्सवस्य आयोजनं कृतम् । परिसरस्य छात्रः शशंकशर्मा (वेदाचार्यप्रथमवर्षस्य) वेदभाषणप्रतियोगितायां सान्त्वनापुरस्कारमवाप्तवान् ।

**वार्षिक-शैक्षणिक-क्रीडा-सांस्कृतिक-प्रतियोगिताः**

- परिसरेण प्रतिवर्षं भाषणप्रतियोगिता, वादविवादप्रतियोगिता, श्लोकपाठप्रतियोगिता, गद्यपाठप्रतियोगिता, अन्त्याक्षरीप्रतियोगिता प्रश्नोत्तरीप्रतियोगिता इत्यादि प्रतियोगिताः, विविधाः क्रीडाप्रतियोगिताः च आयोज्यन्ते । एतासु स्पर्धासु प्रथमद्वितीयतृतीयस्थानं ये छात्राः प्राप्नुवन्ति ते वार्षिकमहोत्सवे पुरस्कृताः भवन्ति ।

**शैक्षणिकं पर्यावरणीयं च भ्रमणम्**

- परिसरेण प्रतिवर्षं प्राक-शास्त्रीत: शास्त्री-आचार्य-बी.एड.-एम.एड.पर्यन्तानां छात्राणां पर्यावरणीय-शैक्षिक-ऐतिहासिक-महत्त्वयुक्तेषु स्थानेषु क्षेत्रयात्राया: आयोजनं क्रियते।

**विभागीयराष्ट्रीयसंगोष्ठ्यः**

- 13-14 मार्चमासस्य 2019 तमे दिनांके सर्वदर्शनविभागेन 'सृष्टिप्रक्रिया' इति विषये द्विदिवसीयराष्ट्रियसंगोष्ठी आयोजिता । संगोष्ठ्या: उद्घाटनं श्री.ला.ब.शा.रा.संस्कृतविद्यापीठस्य प्रो. प्रभाकरप्रसादेन कृतम् । तत्र उद्घाटनसत्रस्य विशेषातिथिः जम्मूविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षः प्रो. रामबहादुरशुक्लः आसीत् । संगोष्ठ्या: समाप्तिः 14.03.2019 दिनाङ्के अभवत्, अत्र मुख्यातिथि: SMVDU विश्वविद्यालयस्य दर्शनविभागस्य अध्यक्ष: डॉ. अनिलतिवारी आसीत् ।

हैदराबादविश्वविद्यालयस्य डॉ. अभिजीतजोशी विशिष्टवक्ता आसीत् । आयोजितेषु सत्रेषु 30 अधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्षपदे परिसरस्य प्राचार्यः आसीत् । संगोष्ठ्या: संयोजक: सर्वदर्शनविभागाध्यक्ष: डॉ. घनश्याममिश्र: आसीत् ।

- *'Adoptability of Vedic Tenets in modern context'* इति विषये वेदविभागेन 14-15 मार्च 2019 दिनाङ्के द्विदिवसीयराष्ट्रियगोष्ठी आयोजिता । संगोष्ठ्या: उद्घाटनं कुरुक्षेत्रविश्वविद्यालयस्य प्रो. राजेश्वरप्रसादमिश्रेण कृतम् । उद्घाटनसत्रस्य विशेषातिथिः वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रवर्यः आसीत् । आयोजितेषु सत्रेषु 25 तः अधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्षः परिसरस्य प्राचार्यः आसीत् । संगोष्ठ्याः संयोजकः वेदविभागस्य डॉ. डी. दयानाथः आसीत् ।

- साहित्यविभागेन 15-16 मार्च 2019 दिनाङ्के 'काव्यस्यात्मा' इति विषये द्विदिवसीयकाव्यविषयकराष्ट्रियगोष्ठी आयोजिता । संगोष्ठ्या: उद्घाटनं परिसरस्य प्राचार्यचरेण प्रो.प्रियतमचन्द्रशास्त्रिवर्येण कृतम् । उद्घाटनसत्रस्य विशेषवक्ता शिक्षाशास्त्रविभागस्य अध्यक्षः प्रो. मदनमोहनझावर्यः आसीत् । संगोष्ठ्याः समापनसत्रस्य आयोजनं 16.03.2019 दिनाङ्के अभवत् । अत्र विशेषातिथिः एस.डी. आदर्श-संस्कृतमहाविद्यालयस्य डॉ. नरेशबत्रावर्यः आसीत् । आयोजितेषु सत्रेषु 25 अधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्ष: परिसरस्य प्राचार्यः अभवत् । संगोष्ठ्याः संयोजकः साहित्यविभागस्य डॉ. नीतूशर्मा आसीत् ।

- 2019 मार्चमासस्य 17-18 दिनाङ्के व्याकरणविभागेन शब्दब्रह्मस्वरूपम् इति विषये द्विदिनात्मिका राष्ट्रियगोष्ठी आयोजिता । संगोष्ठ्याः उद्घाटनं काशीहिन्दूविश्वविद्यालयस्य डॉ. ब्रजभूषणओझावर्येण कृतम्। आयोजितेषु सत्रेषु 20 अधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्षः परिसरस्य प्राचार्यः अभवत् । संगोष्ठ्याः संयोजक: डॉ. सच्चिदानन्दशर्मा आसीत् ।

- शिक्षाशास्त्रविभागेन 2019 मार्चमासस्य 18-19 दिनाङ्के 'समावेशात्मकशिक्षा' इति विषये द्विदिवसीय राष्ट्रियगोष्ठी आयोजिता । संगोष्ठ्याः उद्घाटनं SBSRSV विश्वविद्यालयस्य शिक्षाशास्त्रविभागाध्यक्षेण आर.पी.पाठकमहोदयेन कृतम् । उद्घाटनसत्रस्य विशेषवक्ता साहित्यविभागाध्यक्षः डॉ. सतीशकुमारकपूरः

आसीत् । आयोजितेषु सत्रेषु त्रिंशत्यधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्ष: परिसरस्य प्राचार्यः अभवत् । संगोष्ठ्याः संयोजक: शिक्षाविभागस्य डॉ. मदनसिंहः आसीत् ।

- 2019 तमस्य वर्षस्य 27-28 मार्चमासे 'राष्ट्रियसमस्यासु आतंकवादः : ज्योतिषीयचिन्तनम्' इति विषये द्विदिवसीयराष्ट्रियगोष्ठी आयोजिता । संगोष्ठ्याः उद्घाटनं प्रो. विश्वमूर्तिशास्त्रिमहोदयेन कृतम् । आयोजितेषु सत्रेषु पञ्चविंशत्यधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्षः परिसरस्य प्राचार्यः अभवत् । संगोष्ठ्याः संयोजकः ज्योतिषविभागस्य डॉ. निगमपाण्डेयः आसीत् ।

- आधुनिकविषयविभागेन 2019 तमस्य वर्षस्य 27-28 मार्चमासे दिनाङ्के युद्धं शान्तिं च इति विषये द्विदिवसीय-राष्ट्रियगोष्ठी आयोजिता। संगोष्ठ्याः उद्घाटनं डॉ. विजयकुमारसिंहवर्येण (आईजी, के.रि.पु.बल, जम्मूः) कृतम् । आयोजितेषु सत्रेषु विंशत्यधिकानि शोधपत्राणि प्रस्तुतानि आसन् । संगोष्ठ्याः अध्यक्ष: परिसरस्य प्राचार्यः अभवत् । संगोष्ठ्याः संयोजक: श्री शरत् चन्द्र शर्मा आसीत् ।

- 28.03.2019 दिनाङ्के सर्वासां राष्ट्रियगोष्ठीनां समापनसमारोहस्य आयोजनं कृतम् । समारोहस्य मुख्यातिथिः उत्तराखण्ड-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. देवीप्रसादत्रिपाठी आसीत् । विशेषातिथि: प्रो. सुदेशकुमारशर्मा, (प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः) आसीत् । साहित्यविभागस्य अध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण राष्ट्रियसंगोष्ठीनां प्रतिवेदनं प्रस्तुतम् । ज्योतिषविभागाध्यक्षेण प्रभातकुमारमोहपात्रवर्येण धन्यवादज्ञापनं कृतम् ।

**शारदाविशिष्टव्याख्यानमाला**

- 22.01.2019 तमे दिनाङ्के सर्वदर्शनविभागद्वारा समायोजितायां शारदाव्याख्यानमालायां श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्येण प्रो. के.बी. सुब्बरायुडुवर्येण 'ईश्वरसिद्धिः' इति विषये व्याख्यानं प्रदत्तम् । कार्यक्रमस्य मुख्यातिथिः परिसरस्य पूर्वप्राचार्यः प्रो. विश्वमूर्तिशास्त्रिमहोदयः आसीत् । कार्यक्रमस्य अध्यक्ष: परिसरस्य प्राचार्यः अभवत् ।

- 24.01.2019 तमे दिनाङ्के ज्योतिषविभागेन समायोजितायां शारदाव्याख्यानमालायां प्रो. रामचन्द्रपाण्डेयवर्येण 'ज्योतिषशास्त्रस्य व्यवहारिकत्वम्' इति विषये व्याख्यानं प्रदत्तम् । कार्यक्रमस्य अध्यक्ष: परिसरस्य प्राचार्यः आसीत् ।

- 29.012019 तमे दिनाङ्के वेदविभागेन आयोजितायां शारदाव्याख्यानमालायां ‘वेदव्याख्यानपद्धतिः’ इति विषये वेदविभागाध्यक्षेण प्रो. मनोजकुमारमिश्रवर्येण व्याख्यानं कृतम् । तस्य अध्यक्षता परिसरप्राचार्येण कृता।

- 30.01.2019 तमे दिनाङ्के ज.रा.रा.संस्कृतविश्वविद्यालयस्य पूर्वशिक्षाविभागाध्यक्षेण प्रो. गोपीनाथशर्मवर्येण शिक्षाविभागेन समायोजितायां व्याख्यानमालायां ‘महात्मागान्धीमहोदयस्य शिक्षादर्शम्’ इति विषये व्याख्यानं प्रदत्तम्। तस्य अध्यक्षता परिसरप्राचार्येण कृता।

- 31.01.2019 तमे दिनाङ्के साहित्यविभागेन समायोजितायां शारदाव्याख्यानमालायां प्रो. रामकुमारशर्मवर्येण व्याख्यानं प्रदत्तम्। तस्य अध्यक्षता परिसरप्राचार्येण कृता।

- 06.02.2019 तमे दिनाङ्के व्याकरणविभागे समायोजितायां शारदाव्याख्यानमालायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना प्रो. अर्कनाथचौधरीवर्येण ‘शाब्दबोधप्रक्रिया’ इति विषये व्याख्यानं प्रदत्तम्। तस्य अध्यक्षता परिसरप्राचार्येण कृता।

- 08.02.2019 तमे दिनाङ्के आधुनिकविषयविभागेन आयोजितायां शारदाव्याख्यानमालायां जम्मूविश्वविद्यालयस्य डोगरी-विभागस्य पूर्वाध्यक्षयया प्रो. वीणागुप्तावर्यया ‘डोगरी और संस्कृतं का अन्तःसंबन्ध’ इति विषये व्याख्यानं कृतम् । तस्य अध्यक्षता परिसरप्राचार्येण कृता । सम्पूर्ण-शारदा-व्याख्यानमालायाः समन्वयकौ प्रो. प्रभातकुमारमहापात्रः डॉ. सतीशकुमारकपूरः च आस्ताम् । समितेः सदस्यसचिवः डॉ. रतनकुमारपाण्डेयः आसीत्।

- 21-06-2018 तमे दिनाङ्के अन्ताराष्ट्रिययोगदिवसः समनुष्ठितः । कार्यक्रमे योगगुरुः श्री श्रेयांशकुमारजैनः मुख्यातिथिः आसीत्। भारतीययोगसंस्थानस्य विशेषज्ञयोगाभ्यासिका श्रीमती रेणु थापर उपस्थितानां जनानां कृते योगशिक्षणं कारितवती । कार्यक्रमे प्रो. हरिनारायणतिवारी एवं डॉ. सतीशकुमारकपूरवर्यश्च योगविषयोपरि व्याख्यानं प्रदत्तवन्तौ।

**संस्कृतसप्ताहः**

- 24-08-2018 तमे दिनाङ्के संस्कृतसप्ताहकार्यक्रमस्य उद्घाटनम् अभवत् । उदघाटनसमारोहे परिसरस्य पूर्वप्राचार्यः प्रो. विश्वमूर्तिशास्त्री मुख्यातिथिपदे आसीत् । परिसरस्य आचार्यः प्रो. हरिनारायणतिवारी सरस्वतातिथिरूपेण आसीत् । कार्यक्रमस्य अध्यक्षः परिसरस्य प्राचार्यः आसीत् । संस्कृतसप्ताहोत्सवे छात्राणां कृते विविधाः स्पर्धाः आयोजिताः आसन् ।

- कविगोष्ठ्याः समायोजनं 28-08-2018 तमे दिनाङ्के संस्कृतसप्ताहोत्सवासरे कृतम् । कार्यक्रमस्य अध्यक्षता श्री शरत् चन्द्र शर्मवर्येण कृता । प्रो. रामबहादुरशुक्लः (जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः) मुख्यातिथिः आसीत् । काव्यपाठे डॉ. सतीशकुमारकपूरः, डॉ.आशीषकुमारः, डॉ. विजयकुमारपयासी, डॉ. हरिशंकरपाण्डेयः, डॉ. डी. दयानाथः, डॉ. संजयकुमारमिश्रः, डॉ. तेजनाथपौडेलश्च भागं गृहीतवन्तः ।

- 29-08-2018 तमे दिनाङ्के श्रीशंकरशास्त्रार्थपरिषदः उद्घाटनसमारोहस्य आयोजनमासीत् । शास्त्रार्थपरिषदः प्रथमसत्रस्य आरम्भः वेदविभागस्य आचार्याणां व्याख्यानेन अभवत् । डॉ. डी. दयानाथेन 'मन्त्रब्राह्मणयोर्लक्षणविचारः' इतिविषये व्याख्यानं दत्तम् । डॉ. दीपककुमारशर्मणा यज्ञस्वरूपविमर्शविषये डॉ. धनेशकुमारपाण्डेयेन 'याज्ञवल्क्यशिक्षायां व्यञ्जनोच्चारणप्रकारः इति विषये व्याख्यानं प्रदत्तम् । कार्यक्रमस्य संयोजकः डॉ. सतीशकुमारकपूरः आसीत् ।

- 30-08-2018 तमे दिनाङ्के संस्कृतसप्ताहस्य समापनसमारोहस्य आयोजनं कृतम् । राष्ट्रपतिपुरस्कारेण पुरस्कृतः वरिष्ठ-पुलिस-अधिकारी श्री कुलबीरसिंहमहोदयः मुख्यातिथिः आसीत् । संस्कृतस्य आदरणीयकविः देववाणी परिषदः अध्यक्षः पद्मश्रीः डॉ. रमाकान्तशुक्लः सरस्वतातिथिपदे आसीत् । विशेषातिथिरूपेण डॉ. सतीशकुमारकपूरः उपस्थितः । प्रो. प्रभातकुमारमहापात्रः विशेषवक्तारूपेण आसीत्। कार्यक्रमस्याध्यक्षता परिसरप्राचार्यः अकरोत् ।

- 14-09-2018 तः 28-09-2018 पर्यन्तं परिसरे हिन्दीपखवाड़ामहोत्सवस्य आयोजनं कृतम् । अस्य कार्यक्रमस्य अन्तर्गतत्वेन विविधाः शैक्षणिकप्रतियोगिताः आयोजिताः आसन् । समापनसमारोहस्य मुख्यातिथिः हापुरस्थ-राणाशिक्षाशिविरपीजीमहाविद्यालयस्य प्राचार्यः आसीत् । ओके-इंडिया-

न्यूजचैनल-इत्यस्य श्रीसंजयबंसलः ब्यूरोप्रमुखश्च विशिष्टातिथिरूपेण आसीत् । कार्यक्रमस्य अध्यक्षः परिसरस्य प्राचार्यः आसीत्। कार्यक्रमसंयोजकः डॉ. संजयकुमारमिश्रः आसीत्।

- 16.11.2018 तमे दिनाङ्के परिसरे राज्यस्तरीयशास्त्रीयप्रतियोगितायाः आयोजनमभवत्। अत्र राज्यस्य विभिन्न-शैक्षणिक-संस्थानानां विद्यार्थिनः विभिन्नप्रतियोगितायां भागमगृहीत्। विभिन्नप्रतियोगितायां प्रो. सूर्यमणिरथ:, प्रो. श्रीधरमिश्र:, प्रो. ईश्वरभट्टश्च निर्णायकत्वेन आसन् । कार्यक्रमस्य संयोजनं प्रो. प्रभातकुमारमहपात्रः डॉ. निगमपाण्डेयश्च कृतवन्तौ।

- 4 - 6 जनवरी 2019 पर्यन्तम् परिसरे 'ऑनलाइन वर्चुअल-रिसोर्स' इति विषये राष्ट्रियकार्यशालायाः संगोष्ठ्याश्च आयोजनम् अभवत्। कार्यक्रमस्य संयोजक: प्रो मदनमोहनझावर्यः आसीत्।

- 16-01-2019 तमे दिनाङ्के श्रीशंकरशास्त्रार्थपरिषदः द्वितीयसत्रस्य आयोजनमभवत् । अस्मिन् कार्यक्रमे ज्योतिषविभागस्य शिक्षकैः ज्योतिषशास्त्रस्य विविधविषयेषु व्याख्यानानि प्रदत्तानि।

**2019-20**

**युवमहोत्सवः**

- **2019-20** वर्षस्य युवमहोत्सवः श्रीसदाशिवपरिसरे 07-10 फरवरी 2020 पर्यन्तम् आयोजितमासीत् । महोत्सवे श्रीरणवीरपरिसरस्य छात्राः भागमगृह्णन्।

**संस्कृतसप्ताहोत्सवः**

- 14.08.2019 तः 20.08.2019 पर्यन्तं परिसरे संस्कृतसप्ताहोत्सवः आयोजितः।

**नाट्यमहोत्सवः**

- राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) नवदेहलीद्वारा 30.11.2019 तः 02.12.2019 पर्यन्तं अगरतलानगरस्य एकलव्यपरिसरे नाट्यमहोत्सवस्य आयोजनं कृतम् । श्रीरणवीरपरिसरस्य छात्रैः 'कार्गिलविजयम्' इति संस्कृतनाटकं प्रस्तुतम्।

**अखिलभारतीयशास्त्रीयस्पर्धाः**

- राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:) नवदेहलीद्वारा एकलव्यपरिसरे, अगरतालायां (त्रिपुरा) 9-12 जनवरी, 2020 पर्यन्तम् 57तम्या: अखिलभारतीयशास्त्रीयस्पर्धायाः आयोजनं कृतम् । अस्यां प्रतियोगितायां परिसरस्य चयनितछात्राः विविधस्पर्धासु भागं गृहीतवन्तः ।

**अखिलभारतीयसंस्कृतछात्रप्रातिभमहोत्सव: 2020**

- तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठेन (मानितविश्वविद्यालयेन) अखिलभारतीयसंस्कृतछात्रप्रतिभामहोत्सवस्य आयोजनं 4 तः 7 फरवरी, 2020 पर्यन्तं तिरुपति-(आन्ध्रप्रदेश) नगरे कृतम् । अस्यां प्रतियोगितायां परिसरस्य चयनितछात्राः विविधकार्यक्रमेषु भागं गृहीतवन्तः ।

**विभागीयराष्ट्रियसंगोष्ठ्यः**

- वेददर्शनविभागयो: संयुक्ततत्वावधाने 27-28 फरवरी, 2020 तमे वर्षे 'वैदिकवाङ्मये कश्मीरशैवदर्शनपरम्परायाञ्च शिवतत्त्वम्' इति विषये द्विदिवसीयराष्ट्रियसंगोष्ठ्याः आयोजनं कृतम् ।
- शिक्षाविभागेन 18-20 फरवरी, 2020 यावत् 'संस्कृतशिक्षणे संगणकीयसंसाधनानि: समस्या सम्भावना च' इति विषये त्रिदिवसीयराष्ट्रियगोष्ठी आयोजिता ।
- अन्ताराष्ट्रिययोगदिवसस्य आयोजनं 21.06.2019 दिनांके सम्पन्नम् ।
- हिन्दीपखवाडामहोत्सव: 06-09-2019 दिनांकत: 20-09-2019 दिनाङ्कपर्यन्तम् अभवत् ।
- 04-11-2019 तमे दिनांके परिसरे राज्यस्तरीयशास्त्रीयस्पर्धाया: आयोजनमभवत् । यस्मिन् राज्यस्य विभिन्नशैक्षिकसंस्थानतः छात्राः भागमगृहीतवन्तः ।
- 18 तः 20 फरवरी 2020 पर्यन्तं परिसरे त्रिदिवसीयसंस्कृतकार्यशाला समायोजिता । कार्यक्रमस्य संयोजकः प्रो. मदनमोहनझाः आसीत् ।
- अन्ताराष्ट्रिय-वेबिनार-इत्यस्य आयोजनं शिक्षाविभागद्वारा 29 त: 31 मई, 2020 पर्यन्तमभवत् । कार्यक्रमस्य समन्वयकः प्रो. मदनमोहनझाःआसीत् ।

**2020-21**

- 30.07.2020 तः 05.08.2020 पर्यन्तं परिसरे अन्तर्जालमाध्यमेन संस्कृतसप्ताहोत्सवस्य आयोजनम् अभवत्। अस्मिन् समारोहे विविधप्रतियोगितासु छात्राः भागमगृह्णन्।
- जनवरी 2021 तमे वर्षे शिक्षाशास्त्रविभागेन द्विदिवसीय-राष्ट्रियसंगोष्ठ्याः आयोजनं अन्तर्जालमाध्यमेन कृतम्।
- जनवरी 2021 तमे वर्षे ज्योतिषविभागेन 10-11 फरवरी दिनाङ्के 'ग्रहणविमर्शः' इति विषये द्विदिवसीय-राष्ट्रियगोष्ठीयाः आयोजनं अन्तर्जालमाध्यमेन कृतम्।
- साहित्यविभागेन 16-17 फरवरी दिनाङ्के द्विदिवसीयराष्ट्रिय 'संस्कृतकविसम्मेलनस्य' आयोजनं अन्तर्जालमाध्यमेन कृतम्।
- 29.10.2020 तमे दिनाङ्के वेदविभागेन सरस्वतीपूजनम् आयोजितम्। सरस्वतीपूजनेन शैक्षिकसत्रस्य प्रारम्भः अभवत्।
- 05.09.2020 तमे दिनाङ्के परिसरे अन्तर्जालमाध्यमेन शिक्षकदिवसः आचरितः।
- दिनांक 14.09.2020 से 24.10.2020 तक 'हिन्दी पखवाड़ा' समारोहस्य आयोजनं अन्तर्जालमाध्यमेन कृतम्। कार्यक्रमे छात्राः उत्साहेन भागं गृहीत्वा पुरस्कारं प्राप्तवन्तः।
- महात्मा गांधिनः 152 तमजयन्त्यवसरे 01.10.2020 तः 07.10.2020 पर्यन्तं परिसरे अन्तर्जालमाध्यमेन स्वच्छता सप्ताहस्य आयोजनम् अभवत्। अत्र स्वच्छताविषये महत्त्वपूर्णाः सूचनाः प्रदत्ताः। परिसरेण आयोजिते अस्मिन् अभियाने भलवालखण्डस्य सदस्याः परिसरस्य कर्मचारिणः च भागं गृहीतवन्तः।
- 12.10.2020 तः 18.10.2020 पर्यन्तं परिसरे Digital Learning in Sanskrit इति विषये सप्तदिवसात्मकप्रशिक्षण-कार्यशालायाः आयोजनम् अभवत्।
- 13-14 जून, 2021 दिनाङ्के शिक्षाशास्त्रविभागेन 'गते दशके संस्कृतसंवर्धनम् : दशा दिशा च' इति विषये त्रिदिवसीयराष्ट्रियगोष्ठ्याः आयोजनं अन्तर्जालमाध्यमेन कृतम्।
- अन्तर्जालमाध्यमेन गुरुपूर्णिमापर्व 24.07.2021 दिनाङ्के समायोजितम्।
- अस्मिन् शैक्षिकसत्रे परिसरस्य विविधाः क्रीडा-सांस्कृति-शैक्षिककस्पर्धाः कोरोनाकारणात् स्थगिताः अभवन्।

2021-22

**नाट्यमहोत्सवः**

- केन्द्रीयसंस्कृतविश्वविद्यालयेन भोपालपरिसरे 22.03.2022 तः 24.03.2022 पर्यन्तं 18तमः नाट्यमोत्सवः आयोजितः । परिसरस्य छात्रैः श्री शिवजी उपाध्याय रचितं **'स्वातन्त्र्यशौर्यम्'** इति संस्कृतनाटकं प्रस्तुतम् । परिसरच्छात्रा अनीशसन्मोत्रा (आचार्यः) प्रथमपुरस्कारं सर्वश्रेष्ठाभिनेतास्थानं च, अमन सढोत्रा (आचार्यः) द्वितीयपुरस्कारं, सुमित शर्मा (आचार्यः) च तृतीयपुरस्कारं प्राप्तवन्तः ।




**स्वातन्त्र्यशौर्यनाटकं प्रस्तुवन्तः परिसरच्छात्राः**




**राष्ट्रियसेवायोजनायाः प्रारम्भः (NSS)**

- अस्मिन् वर्षे परिसरे राष्ट्रियसेवायोजनायाः अन्तर्गत्वेन एकलद्वये 200 स्वयंसेवकानां अनुमोदनं प्राप्तम् । परिसरे प्रायः 180 छात्राः पञ्जीकृताः सन्ति । राष्ट्रियसेवा योजनायाः कार्यक्रमसमन्वयकः डॉ. योगेन्द्रदीक्षितः कार्यक्रमस्य अधिकारी श्री मनीन्दरसिंहः च वर्तते ।

- 2021 तमस्य वर्षस्य नवम्बरमासस्य 22 दिनाङ्के राष्ट्रियसेवायोजना-एककेन प्रेरणासत्रस्य आयोजनं कृतम् । कार्यक्रमे वियानी कॉलेज फॉर गर्ल्स, जयपुर इत्यस्य उपप्राचार्यः डॉ. ध्यानसिंह गोथवालः मुख्यवक्ता आसीत् ।

- 2021 तमस्य वर्षस्य नवम्बर्-मासस्य 26 दिनाङ्के राष्ट्रियसेवायोजनायाः एकलद्वयस्य उद्घाटनं संविधानदिवससमारोहे जातम् । कार्यक्रमे श्री शक्तिपाठकः (IPS) मुख्यातिथिः, विशेषातिथिः डॉ. उधम दास शर्मा, उपसचिवः, ग्रामीणविकासः पंचायती राजविभागः, सरस्वतातिथिः हिमाचल आदर्श संस्कृतमहाविद्यालयस्य हिन्दीविभागस्य सहाचार्या डॉ. स्नेहलता भारद्वाज विशिष्टातिथिः च आसन् । कार्यक्रमस्य अध्यक्षता परिसरनिदेशकेन प्रो. मदन मोहन झा महोदयेन कृता । कार्यक्रमस्य अधिकारी डॉ. योगेन्द्र दीक्षितः श्री पंकजः आसीत् ।

- राष्ट्रियसेवायोजनायाः स्वयंसेवकानां कृते देशभक्तिगीतलेखनं, रङ्गोलीरचना च 30 नवम्बर 2021 दिनाङ्के आयोजिता ।

- अन्ताराष्ट्रियमानवाधिकारदिवसस्य आयोजनं 2021 तमस्य वर्षस्य दिसम्बरमासस्य 10 दिनाङ्के अन्तर्जालमाध्यमेन अभवत् । अवसरेऽस्मिन् महात्मा गांधी केन्द्रीय विश्वविद्यालय मोतिहारी विश्वविद्यालयस्य शान्ति-अध्ययनविभागाध्यक्षः प्रो. सुनील महावरवर्यः विशिष्टव्याख्यानम् अदात् । कार्यक्रमस्य अध्यक्षता परिसरनिदेशकेन कृता ।

- डिसेम्बर्-मासस्य 16 दिनाङ्के बैक् टु लाइफ्-संस्थया निःशुल्क फिजियोथेरेपी-शिबिरस्य आयोजनं कृतम् ।

- स्वतन्त्रतायाः अमृतमहोत्सवे ‘Know your Constitution’ इत्यभियाने ‘नुक्कड नाटकस्य’ मंचनं भलवालग्रामे 17 दिसम्बर 2021 दिनाङ्के छात्रैः कृतम्।

- 2022 तमस्य वर्षस्य जनवरी-मासस्य 12 दिनाङ्के ऑनलाइन-माध्यमेन राष्ट्रिययुवदिवसस्य आयोजनं कृतम्। अत्र मुख्यवक्ता लखनऊ-नगरस्य विद्यान्त पी.जी.महाविद्यालयस्य डॉ. बृजेन्द्रपाण्डेयः आसीत्। कार्यक्रमस्याध्यक्षः परिसरनिदेशकः प्रो. मदनमोहनझावर्यः आसीत्।

- मकरसंक्रान्तेः अवसरे सूर्यनमस्कारस्य आयोजनं 2022 तमस्य वर्षस्य जनवरी-मासस्य 14 दिनाङ्के अभवत्।

- अन्ताराष्ट्रिययोगदिवसस्य आयोजनं 21.06.2021 दिनांके कृतम्।

**परिसरे समायोजिताः विविधाः कार्यक्रमाः**

- परिसरे 09.07.2021 दिनाङ्के 'सत्रांतसमारोहस्य' आयोजनं जातम्। समारोहे मुख्यातिथिः राष्ट्रियसंस्कृतविश्वविद्यालयस्य परीक्षानियन्त्रकः डॉ. के. साम्बशिवमूर्तिमहोदयः, सारस्वतातिथिः केन्द्रीयसंस्कृतविश्वविद्यालय भोपालपरिसरस्य निदेशकः प्रो. जे. भानुमूर्तिमहोदयः, विशिष्टातिथिः डॉ. गणेशपण्डितमहोदयः, सहायकाचार्यः शृंगेरीपरिसरः उपस्थिताः आसन्। कार्यक्रमस्य अध्यक्षता परिसरनिदेशकेन प्रो मदनमोहनझामहोदयेन कृता। अस्मिन् समारोहे सर्वेऽपि विभागीयशिक्षका: छात्राश्च उपस्थिता: आसन्।

- परिसरे 24.07.2021 दिनाङ्के ‘गुरुपूर्णिमा' उत्सवस्य आयोजनं कृतम्। अस्मिन् महोत्सवे मुख्यातिथिः केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य पूर्वनिदेशकः प्रो. अर्कनाथचौधरीमहोदयः, विशेषातिथिः वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रमहोदयः, सारस्वतातिथिः साहित्यविभागाध्यक्ष: प्रो. सतीशकपूरमहोदयः च आसन्। अस्मिन् महोत्सवे ज्योतिषविभागाध्यक्षः प्रो. प्रभातकुमारमहापात्रः, आधुनिकविभागस्य अध्यक्षः श्रीशरत् चन्द्र शर्मा, शिक्षाविभागस्य आचार्यः प्रो. कुलदीपशर्मा, व्याकरणविभागाध्यक्षः डॉ. कैलासचन्द्रदाशः उपस्थिता आसन्। कार्यक्रमस्य अध्यक्षः परिसरनिदेशकः प्रो. मदनमोहन झाः महोदयः आसीत्।

- संस्कृतसप्ताहस्य आयोजनं 19.08.2021 तः 25.08.2021 पर्यन्तं अन्तर्जालमाध्यमेन अभवत् । अत्र पञ्चमीतः द्वादशीकक्षापर्यन्त अधीयानानां छात्राणां सामाजिकजनानां कृते श्लोकगायन-भाषण-प्रतियोगितानां आयोजनं कृतम् । प्रतिभागिभ्यः प्रमाणपत्राणि पुरस्काराणि च प्रदत्तानि ।
- 'शिक्षकदिवस' समारोहस्य आयोजनं 05.09.2021 दिनाङ्के अभवत् । अस्मिन समारोहे मुख्यातिथिः श्री भरतभूषणमहोदय: (अध्यक्षः जिलाविकासपरिषद् जम्मूः) आसीत् । विशिष्टातिथिः श्री सूरजप्रसादमहोदयः (प्राचार्यः, केन्द्रीयविद्यालयः, बन्तलाब, जम्मूः) आसीत् । परिसरनिदेशक: प्रो. मदन मोहन झा महोदयः कार्यक्रमस्य अध्यक्षः आसीत् । कार्यक्रमस्य संयोजक: प्रो. कुलदीपशर्मा आसीत् । अस्मिन् कार्यक्रमे श्री भूषणभारद्वाज:, (संस्कृतशिक्षक:, सीमा सुरक्षा बल पलोरा, जम्मूः) श्री अरुणकुमारशर्मा, (संस्कृतशिक्षकः, केन्द्रीयविद्यालयः, अखनूर 2, जम्मूः) श्री अपराजित शर्मा, (संस्कृतशिक्षकः, केन्द्रीयविद्यालयः, बन्तलाब, जम्मूः) डॉ. योगेन्द्रदीक्षितः, (प्राध्यापकः परिसरस्य राजनीतिविज्ञानम्), शिक्षाशास्त्रविभागस्य सहायकप्राध्यापकः डॉ. विजयकुमारजेनामहोदयः च विशिष्टशिक्षकपुरस्कारेण सम्मानिताः । समारोहे परिसरस्य सर्वे शिक्षकाः उपस्थिताः आसन् ।
- 23.09.2021 दिनांके ज्योतिषविभागस्य प्राध्यापकः डॉ. नवीनतिवारी पलभा-परीक्षणं च कृतम् ।
- 2-9 अक्टोबर 2021 पर्यन्तं स्वच्छतासप्ताहस्य आयोजनं सञ्जातम् ।
- 01.10.2021 तमे दिनाङ्के 'सत्रारम्भसमारोहस्य' आयोजनं कृतम् । अत्र मुख्यातिथिरूपेण तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालयस्य आचार्यः प्रो. राधागोविन्दत्रिपाठी उपस्थितः । अध्यक्षः परिसरनिदेशक: प्रो. मदनमोहन झा महोदयः आसीत् ।
- 01.10.2021 त: 18.10.2021 पर्यन्तं संस्कृतभाषणशिविरस्य आयोजनं संजातम् । अत्र प्राक्-शास्त्री, शास्त्री, शिक्षाशास्त्री कक्षायाः छात्रेभ्यः संस्कृतसम्भाषणकौशलप्रशिक्षणं प्रदत्तम् । अस्य समन्वयकः साहित्यविभागस्य प्राध्यापकः श्री पङ्कजः आसीत् ।
- अन्ताराष्ट्रिय-अहिंसादिवसः 02.10.2021 दिनाङ्के महात्मागांधी जयंत्यवसरे अन्तर्जालमाध्यमेन कृतः। अत्र मुख्यातिथिः प्रो. संजीवकुमारशर्मा, (कुलपतिः, महात्मा गांधी केन्द्रीय विश्वविद्यालयः, मोतिहारी

बिहार) 'वर्तमान सन्दर्भे गांधी धर्मस्य प्रासंगिकता' इति विषये सारगर्भितव्याख्यानम् अदात् । अस्य कार्यक्रमस्य अध्यक्षः प्रो. मदनमोहन झाः महोदयः आसीत् । संयोजकः च डॉ. योगेन्द्रदीक्षितः आसीत् ।

- 28.10.2021 तमे दिनाङ्के परिसरे सतर्कता-जागरूकता-सप्ताहस्य आयोजनं कृतम् । अत्र श्री राजदेवसिंहः (सरपंच) परिसरनिदेशकः प्रो. मदनमोहन झाः च सर्वेषां छात्राणां, प्राध्यापकानाम्, कर्मचारिणां च शपथं कारितवन्तौ ।
- 31.10.2017 दिनाङ्के परिसरे राष्ट्रिय-एकीकरणदिवसस्य आयोजनं कृतम् । कार्यक्रमस्य संयोजकः डॉ. घनश्याममिश्रः आसीत् ।
- राष्ट्रियशिक्षादिवसस्य आयोजनं 11.11.2021 तमे दिनाङ्के अभवत् । अत्र प्रो. राकेशकुमार गोस्वामी, (क्षेत्रीयनिदेशकः, भारतीय जनसंचार संस्थान) मुख्यातिथिरूपेण उपस्थितः आसीत् । कार्यक्रमस्य अध्यक्षः परिसरनिदेशकः आसीत् ।
- 'विश्वदर्शनदिवसः' 18 नवम्बर 2021 तमे दिनाङ्के आचरितः । कार्यक्रमे 'मानवीय तथा नैतिक मूल्यों के विकास में भारतीय दर्शन की भूमिका' इति विषये प्रो. अम्बिकादत्त शर्मा मुख्यातिथिरूपेण व्याख्यानम् अदात् । डॉ. अनिलकुमार तिवारी सम्मानितरूपेण अन्तर्जालमाध्यमेन व्याख्यानं प्रदत्तवान् । कार्यक्रमस्य अध्यक्षता प्रो. मनोज कुमार मिश्र महोदयेन कृतम् । डॉ. घनश्याममिश्रः कार्यक्रमस्य संयोजकः असीत् ।
- 24-25 नवम्बर, 2021 तमे दिनाङ्के 'वेदे समाजिकसन्देशः' विषये द्विदिवसीया अन्ताराष्ट्रिय वेदसंगोष्ठी आयोजिता । अस्मिन् कार्यक्रमे मुख्यातिथिः प्रो. हृदयरंजन शर्मा (सेवानिवृत्तः आचार्यः, काशी हिन्दू विश्वविद्यालयः, वाराणसी) प्रो. सन्निधानं सुदर्शन शर्मा (कुलपतिः, श्री वेंकटेश्वर वेद विश्वविद्यालयः, तिरुपतिः) डॉ. सुनील कात्यायनः (सहाचार्यः, काशी हिन्दू विश्वविद्यालय, वाराणसी) डॉ. नरेन्द्र तिवारी (कुलपतिः, नवनालन्दा बिहार, मानितविश्वविद्यालयः) प्रमुखाः आसन् । कार्यक्रमस्य अध्यक्षता प्रो. मनोज कुमार मिश्र महोदयेन कृतम् ।
- राष्ट्रियसेवायोजना-शिक्षाविभागयो: संयुक्ततत्त्वावधाने 10.12.2021 दिनांके 'मानवाधिकारदिवसः' आयोजितः। मुख्यातिथिः प्रो. सुनील महावर (विभागाध्यक्षः, गांधी एवं शान्ति अध्ययनविभागः, महात्मा गांधी केन्द्रीय विश्वविद्यालय मोतिहारी बिहार ) आसीत् । कार्यक्रमस्य अध्यक्षः परिसरनिदेशक: प्रो मदनमोहन झा आसीत् ।

- 11.12.2021 तः 17.12.2021 पर्यन्तं साहित्यविभागेन सप्तदिवसीय ऑनलाइन छन्दोगानप्रशिक्षण कार्यशालायाः आयोजनं कृतम् । अस्याः कार्यशालायाः संयोजनं साहित्यविभागस्य सहायकाचार्यः श्री पंकजः डॉ. नीतु शर्मा, डॉ. तेजनाथ पौडेलः डॉ. सुमन चन्द्र पंत 'सुमन्त' च कृतवन्तः ।
- 'गीता जयंती समारोहः' 14.12.2021 दिनांके आयोजितः । समारोहे सेना पब्लिक स्कूल, जम्मू कैंट, सीमा सुरक्षा बल विद्यालयः, पलौरा, केन्द्रीय विद्यालय संगठन, जम्मू संभागः, गांधीनगरम्, "राज्य सर्वकार विद्यालयः, जम्मूः इत्यादिविद्यालयानां छात्राः भागं गृहीतवन्तः ।
- सूर्यनमस्कारस्य आयोजनं मकरसंक्रान्त्यवसरे 14.01.2022 दिनांके अभवत् । अत्र परिसरस्य शिक्षकाः, कर्मचारिणः, छात्राः च सूर्यनमस्कारं कृतवन्तः ।
- 24-25 जनवरी 2022 दिनाङ्के 'विभक्त्यार्थ चर्चा' इति विषये अन्ताराष्ट्रियव्याकरणशोधसंगोष्ठी आयोजिता । अस्याः उद्घाटनसमापनरूपेण द्वौ सत्रौ आयोजितौ । यस्य उद्घाटनसत्रे परिसरस्य निदेशकः प्रो. मदन मोहन झाः अध्यक्षः आसीत् । काशी हिन्दू विश्वविद्यालयस्य डॉ. ब्रजभूषण ओझाः मुख्यातिथिः आसीत् । अस्मिन् एव सत्रे ज्यूरिक विश्वविद्यालयस्य न्यूजीलैण्डदेशस्य विशिष्टः विद्वान् डॉ. सौरभ अब्बी अतिथिरूपेण उपस्थितः आसीत् । तदनन्तरम् अष्टौ सत्राणि आयोजितानि । तत्र 100 पत्रलेखकाः 150 प्रतिभागिनः च आसन् । समापनसत्रे अध्यक्षरूपेण परिसरस्य निदेशकः प्रो. मदनमोहन झाः उपस्थितः आसीत् । श्रीलालबहादुरशास्त्री, राष्ट्रियसंस्कृतविश्वविद्यालयस्य आचार्यः, प्रो. रामसलाही द्विवेदी, केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्री राजीव गांधी परिसरस्य डॉ. चन्द्रशेखर भट्टः च विशेषव्याख्यानं कृतवन्तौ ।
- 25.01.2022 दिनांके परिसरे राष्ट्रीय मतदाता दिवसः आयोजितः । कार्यक्रमस्य समन्वयनं डॉ. योगेन्द्र दीक्षितेन कृतम् ।
- 27.01.2022 तः 04.02.2022 पर्यन्तं आधुनिकविषयविभागेन मानवमूल्यानां विषये आभासीमाध्यमेन सप्तदिवसीयस्य संकायसंवर्धनकार्यक्रमस्य आयोजनं कृतम् । अत्र विद्वांसः प्रतिदिनं व्याख्यानानि प्रयच्छन्ति स्म । अस्मिन् कार्यक्रमे परिसरस्य सर्वे शिक्षकाः शोधविद्वांसः च भागं गृहीतवन्तः । कार्यक्रमस्य समन्वयनं डॉ. संजयकुमार मिश्रः श्री विशालमहाजनः च कृतवन्तौ ।

